## ।। अथ एकोन~~त्रिंश~~चत्वारिंशोऽध्यायः ।। Chapter-39

मांधातोवाच :- कथं ताः कन्यका ब्रह्मन् ब्राह्मणानां[1] रसातले ।।
अभवन् सारिका[2]नीताः कंकोलश्वासितास्तदा ।। १

वसिष्ठ उवाच :- कंकोलस्य सुतां राजन्विवरायामुदूढवान् ।।
श्रीमाले कुंडपो विप्रस्तस्य ये सूनवो[6]ऽभवन् ।। २

तेषां पुत्राश्च पौत्राश्च श्रीमाले बहवः स्मृताः ।।
पातालेऽभून्नृपश्रेष्ठ तेषामव्याहता गतिः ।। ३

ते कदाचिदु पागत्य द्विजैः[3] श्रीमालवासिभिः ।।
कन्यादुः स्वपराभूतैरित्युक्ता मधुराक्षरम् ।। ४

कौंडपेया द्विज[4]श्रेष्ठा भद्रं वोऽस्तु शतं समाः ।।
प्रेरयंति द्विजा युष्मान् पातालं प्रति[5]गच्छथ ।। ५

कन्याः सारिकया नीता वेदगर्भ[6]द्विजन्मनाम् ।।
भवंति यदि जीवंत्यस्तदानयत मा चिरम् ।। ६

तथेत्युक्त्वा तु ते सर्वे जग्मुः पातालमंजसा ।।
मातामहगृहे कन्या दृष्टवंतस्तथाविधाः ।। ७

-०-

१ ए ब्रह्मणा
२ ए मारिका
३ ए दिजैः
४ ए दिज
५ ए पतिगच्छथ
६ ए सुनवो
७ ए वेदागर्भादिजन्मनाम्

कृतालंकरणा: सर्वाश्चाहचंदनचर्चिता:[1] ।।
अव्याहतानि वासांसि वसाना विमलस्त्रज: ।। ८

कंकोलं नागराजानं प्रणम्य विनयान्विता: ।।
बद्धांजलिपुटा: सर्वं इदमूचुरतंद्रिता: ।। ९

राक्षसी सारिका नाग जगृहे द्विजकन्यका: ।।
ता इमा: खलु जानीमो वसंति स्वगृहे यथा ।। १०

असामर्थ्ये द्विजन्मान:[2] श्रीमाले संति दु:खिता: ।।
मातरो भ्रातरश्चैव तथा संबंधिबांधवा: ।। ११

कन्यापितृत्वं दु:खाय नराणां मानकांक्षिणाम् ।।
गृहे यस्य प्रजायंते स भवेद्दु: खभाजनम् ।। १२

अनुरूपवराभावात् कौमारे दु:खदा: स्त्रिय: ।।
यौवने दोषाशंकित्वाद्वैधव्याद्वार्द्धके नृणाम् ।। १३

हृदयेषु द्विजेंद्राणां वासरातिक्रमादिह ।।
दाहाय ता: प्रजायंते तूलेष्वग्निकणा[3] इव ।। १४

—०—०—

१ ई चर्चित:

३ ई करीषाग्निकणा इव

२ ई दिज

कंकोल उवाच :- सौहार्द्रीम्दिवतां वत्सा मयैता: परिपालिता: ।।
वयश्च तद्वदेवास्ति कन्यानां मत्प्रभावत: ।। १५

अहमप्यागमिष्यामि श्रीमालं देववत्सलम् ।।
एता:कन्या: प्रदास्यामि द्विजेभ्योऽनुग्रहेच्छया ।। १६

एवमस्त्विति ते प्रोक्ता कंकोलं नागनायकम् ।।
पुरस्कृत्य ययुर्हृष्टा: श्रीमालं सहकन्यका: ।। १७

कोऽपेयान्निशम्याथं कंकोलेन सहागतान् ।।
ताश्च कन्या: समानीता भृशं मुमुदिरे द्विजा: ।। १८

ते श्रीमालं पुन: चक्रु: सारप्राकारगोपुरम् ।।
रथ्या रथ्यातलांश्चैवा प्रासादानाश्रमांस्तथा ।। १९

हर्षादभिमुखं प्राप्ता: सबला स्थविरा नृप ।।
तदा सौ नागकंकोलः प्रत्युत्थानपरोऽभवत् ।। २०
ततस्तं ब्राह्मणा: सर्वे दृष्ट्वा नागं सहस्थितं ।।
फणामणिमहादीप्तिदिगन्तं तुष्टवुर्मुदा ।। २१

-०-०-

३ ई महागतान्

४ ई परोभवत्

१ ए सौहार्द्रम्दिवतां

२ ए प्रदस्या

६ ए द्व

७ ए पराऽभवे

५ ए ततश्तं ब्राह्मणा: सर्वेदृष्टवा नागं सहश्थितं

८ ए दिप्ति

ब्राह्मणा ऊचुः -

नमस्ते[1] काद्रवेयाय कंकोलाय महात्मने ।।
पिंगलाय प्रकालाय नागानां पतये नमः ।। २२

जीमूताय नमस्तुभ्यं व्यालायामृतवर्षिणे ।।
चतुर्भुजाय कृष्णाय नमः सप्तफणाय ते ।। २३

भक्तत्राणवदान्याय नमः पातालवासिने ।।
अजराय तथा चोग्रविषश्वासो[3]र्मिमालिने ।। २४

जगत्त्रयमिदं व्याप्तं कथं जीवेद्विपाग्निना[2] ।।
यदि यूयं महाभागा न सिंचत कृपामृतैः ।। २५

प्रजाश्चैवोपजीवंति प्रवर्तंते ततः क्रियाः ।।
नमोऽस्तु भुवि सर्पेभ्यो ये केचिद्दिवि संस्थिताः ।। २६

येऽतरिक्षे च देवेभ्यास्तेभ्य एव नमो नमः ।।
इति स्तुत्वा द्विजेंद्रास्ते शिरसा[4] जगतीं ययुः ।। २७
फणींद्रोऽपि निवार्यैतान्निदमाह मुदान्वितः ।।
स श्लाघ्यः स महाभागः सुकृती स तपोनिधिः ।। २८

-0-

१ ई ए नमस्तेकाद्रवे
२ ई द्विषाग्निना

३ ए चोग्रविवश्वाग्मिमालिने
४ ए सिरसा

चित्ते समनुमन्यते द्विजाब्रह्मविदः[1] सदा ।।
एताः सर्वाः कुमार्यो वः कृतकौतुकमंगलाः ।। २९

यथाहूताः सारिकया तथैवं ध्रुवमासते ।।
वसिष्ठ उवाच :- इत्युक्तास्ते द्विजा राजन् परिष्वज्य निजाःसुताः ।। ३०

हर्षादश्रुणिर्मुंचतः प्राहुः[2] कंकोलमादरात् ।।
किं कुर्मस्तव नागेंद्र कर्मणानेन तोषिताः ।। ३१

कृते ह्यप्रतिकुर्वाणाः प्रयांति नरकं ध्रुवम् ।।
नागराज उवाच :- यदि तुष्टा द्विजन्मानः प्रदेयो हि वरो मम ।। ३२

ततो हव्येषु कव्येषु प्रीणायंतु फणीश्वरान् ।।
द्विजाऊचुः उत्सवेषु समस्तेषु श्राद्धकर्म्मसु सर्वतः ।। ३३

बलिदानेन नागेंद्रास्तर्पयिष्यामहे वयम् ।।
कंकोल उवाच :- एवं प्रकुर्वतां विप्रा नागेभ्यो न भयं क्वचित् ।। ३४

न रक्षोभ्यश्च दुष्टेभ्यः कदाचन भविष्यति ।।
अत्रांशेन निवत्स्यामो वयं सर्वे द्विजोत्तमाः ।। ३५

-०-

१ ए ब्रह्मविद

२ ए प्राह

स्तुता आराधिता भक्त्या दास्यामो भक्तवांछितम् ॥
द्विजा ऊचुः एवमस्तु फणिश्रेष्ठ कंकोल द्विजवत्सल ॥ ३६

शिवास्ते संतु पन्थानः[2] पातालमभिगच्छतः ॥
वसिष्ठ उवाच :- एवमुक्तो द्विजश्रेष्ठैर्यथास्थानमगात् फणी ॥ ३७

आदाय कन्या मुदिता द्विजेंद्राः प्रययौ[1] गृहान् ॥
एतत्ते कथितं राजन् कन्यागमनमुत्तमम् ॥ ३८

कंकोलस्य च माहात्म्यं नृणां पापप्रणाशनम् ॥

-०-

इति श्री स्कंदपुराणे श्रीमालमाहात्म्ये कंकोलोपाख्यान नामैकोनचत्वारिंशत्तमोऽध्यायः ॥

१ ए प्रययौ
२ ए पंथानं